# शब्दविमर्शः - खच्प्रत्ययान्तशब्दानामवलोकनम् ।

डा. वि. आर्. मनोजः, उपनिदेशकः, चिन्मयशोधसंस्थानम्

## पुरन्दरः ।

पुरन्दरः इन्द्रः। अयमपरः खच्प्रत्ययान्तः शब्दः। शत्रुपुरदारकत्वादिन्द्रस्य पुरन्दरत्वम्। 'पूः सर्वयोर्दारिसहोः' (3.2.41) इति सूत्रेण पुर् सर्व इत्येतयोः कर्मणोरुपपदयोः यथासंख्यं 'दॄ विदारणे' (क्र्या.1493), 'षह मर्षणे' (भ्वा.852) इत्यनयोर्धात्वोः खच्प्रत्ययो विधीयते। आदौ पुरन्दरशब्दस्योदाहरणान् द्रक्ष्यामः।

सन्तानलब्ध्यै उपायमन्विषन् सभार्यो दिलीपः गुरोः वसिष्ठस्याश्रमं प्राप। तत्र मुनिकल्पितां कामधेनुसुतायाः नन्दिन्याः परिपालनरूपां संविधां समासाद्य प्रसन्नचेताः पुनः स्वपुरं प्रविशति -

पुरन्दरश्रीः पुरमुत्पताकं प्रविश्य पौरैरभिनन्द्यमानः। भुजे भुजङ्गेन्द्रसमानसारे भूयः स भूमेर्धुरमाससञ्ज।। इति (रघुवंशम् 2.74)। असुराणां पुरीः दारयतीति पुरन्दरः शक्रः। तस्य श्रीरिव श्रीर्यस्य स नृपः पौरैरभिनन्द्यमानः उत्पताकम् = उच्छ्रितध्वजं पुरं प्रविश्य भुजगेन्द्रेण समानसारे = तुल्यबले भुजे भूयो भूमेर्धुरमाससञ्ज = स्थापितवान् इति भावः। प्रकृतसूत्रेण खच्प्रत्ययः। 'वाचंयमपुरन्दरौ च' (6.3.69) इति निपातनाददन्तत्वं मुमागमश्च।

उदाहरणान्तरमवेक्षन्ताम्। अरिवधेन निष्कण्टकं स्वर्लोकम् इन्द्राय देवहितार्थं दद्यादिति कृष्णं प्रति नारदवचः -

हृदयमरिवधोदयादुदूढद्रढिम दधातु पुनः पुरन्दरस्य। घनपुलकपुलोमजाकुचाग्रद्रुतपरिरम्भनिपीडनक्षमत्वम्।। इति (शिशुपालवधम् 1.74)। अरिवधोदयाद् = रिपुनाशलाभात्। उदूढद्रढिम = नैश्चिन्त्याद्धृतदार्ढ्यम्। स्वस्थमित्यर्थः। पुरः = शत्रुपुराणि दारयतीति पुरन्दर इन्द्रः। 'पूः सर्वयोर्दारिसहोः' इति खच् प्रत्ययः। 'वाचंयमपुरन्दरौ च' (6.3.69) इति निपातनाददन्तत्वं मुमागमश्च। तस्य हृदयं पुनर्भूयोऽपि। पूर्व-वदेवेति भावः। घनपुलकयोः सान्द्ररोमाञ्चयोः। पुलोम्नो जाता पुलोमजा = शची तस्याः कुचाग्रयोर्द्रुतपरिरम्भः = औत्सुक्याच्छीघ्रालिङ्गनं तत्र यत्पीडनं तस्य क्षमत्वं = सहत्वं दधातु। प्राक्चित्तविक्षेपात्त्यक्तभोगेन शक्रेण सम्प्रति त्वत्प्रसादान्निष्कण्टकं स्वकीयं राज्यं भुज्यतामित्यर्थः।

'पूः सर्वयोर्दारिसहोः' इति सूत्रेण पुर् सर्व इत्येतयोः कर्मणोरुपपदयोः यथासंख्यं 'दॄ विदारणे', 'षह मर्षणे' इत्यनयोर्धात्वोः खच्प्रत्ययो विधीयते। तयोरिह पुरन्दरशब्द उदाहृतः। सर्वंसहशब्द अग्रे वक्ष्यते।

## सर्वंसहः ।

अयमपरः खच्प्रत्ययान्तः शब्दः। सर्वं सहत इत्यर्थः। निन्दातिरस्कारादीनपि यो मर्षयति सः सर्वंसहः। अत एव सर्वंसहेति भूमेरपरं नाम। सर्वंसहा वसुमती वसुधोर्वी वसुन्धरेत्याद्यमरः। ननु का निन्दा को वा तिरस्कारः यत्सर्वं भूमिः सहत इति चेदुत्खननोच्छेदनोत्पाटनविदारणानि भूनिन्दापराणि प्राणिकर्माणि। विशेषतो मनुष्येण क्रियमाणानि। सुवर्णादिनिधिलिप्सया क्षितितलमुत्खनन्ति। भवनार्थम् इन्धनाद्यर्थञ्च वृक्षानुच्छिन्दन्ति। गिरेर्धातून् धमन्ति। अप्स्वन्तरिक्षे च धूमादिविसर्ज्यान् प्रक्षिपन्ति। किमन्यन्न कुर्वन्ति भूवासिनो यत्सर्वं सा न सहते ?

तदास्ताम्। सर्वंसहशब्दे ‘पूः सर्वयोर्दारिसहोः’ (3.2.41) इति सूत्रेण सर्व इत्येतस्मिन् कर्मण्युपपदे ‘षह मर्षणे’ (भ्वा.852) इत्यस्माद्धातोः खच्प्रत्ययो विधीयते। उदाहरणान्तरमवेक्षन्ताम्। भट्टिकाव्ये हनूमान् तेन सङ्गतौ रामलक्ष्मणौ प्रति सुग्रीवसख्यं लाभायेत्याह - वाचंयमोऽहमनृते सत्यमेतद् ब्रवीमि ते। एहि सर्वंसहं मित्रं सुग्रीवं कुरु वानरम्।। (भट्टिकाव्यम् 6.102)। तस्मात् सत्यमेतत् पूर्वोक्तम्। ब्रवीमि ते = तुभ्यम्। यत एवं तस्मादेहि आगच्छ। सुग्रीवं वानरं मित्रं कुरु। कीदृशं, सर्वंसहम्।

सख्युः सर्वंसहत्वस्य कृष्णार्जुनयोः मिथः यद्यद्वृत्तं तदेव निदर्शनम्। कृष्णं परमात्मानं विज्ञायार्जुनस्तप्तो ब्रूते - सखेति मत्वा प्रसभं यदुक्तं हे कृष्ण हे यादव हे सखेति। अजानता महिमानं तवेदं मया प्रमादात्प्रणयेन वापि।। यच्चावहासार्थमसत्कृतोऽसि विहारशय्यासनभोजनेषु। एकोऽथवाप्यच्युत तत्समक्षं तत्क्षामये त्वामहमप्रमेयम्।।(भगवद्गीता 11.41, 42)।। इत्येवमादिभिः श्लोकैरर्जुनेन क्षमायाचनपूर्वकं यद्यदवहासार्थं कृतमाचचक्षे तत्सर्वं ततोऽधिकं वा सहत इत्यर्थः।